# आख्यातार्थसन्दर्भे कर्त्रधिकरणसमन्वयविमर्शः

प्रलय-नन्दी
शोधच्छात्रः, संस्कृतदर्शनविभागः
रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानम्,
बेलुडमठः, हावडा, पश्चिमवङ्गः

**प्रबन्धसारः**

जैमिनीयसूत्रपाठे तृतीयाध्याये चतुर्थपादे "नानृतं वदेदि"ति[1] वाक्यमाश्रित्य मीमांसकैराख्यातस्य कर्तृवाचकत्वावाचकत्वयोः विषये पूर्वपक्षसिद्धान्तयोः उपस्थापनं कृतम्। अतस्तदधिकरणं कर्त्रधिकरणमिति प्रसिद्धम्। तत्राख्यातस्य कर्त्राद्यर्थकत्वं स्वीकुर्वतां वैयाकरणानां मते अनृतवर्जनस्य क्रतुयुक्तपुरुषार्थत्वमिति सिद्धान्तः। आख्यातस्य भावनार्थकत्वं मन्वाना मीमांसकास्तु अनृतवर्जनस्य शुद्धक्रत्वर्थत्वमिति निरूपयन्ति। एवं मतविरोधात् तत्तत्सम्प्रदाये कर्त्रधिकरणस्थयोः पूर्वपक्षसिद्धान्तयोः उपन्यासो भिद्यते। प्रकृतप्रबन्धे नागेशभट्ट-कुमारिलभट्टौ मुख्यौ मल्लौ वर्तेते। अत्र प्रथमतः तत्तन्मतदिशा कर्त्रधिकरणस्य समन्वयः प्रदर्शितस्तदनु विस्तरेण विमर्शः प्रस्तुतः।

**मूलशब्दाः**

कर्त्रधिकरणम्, जञ्जभ्यमानाधिकरणम्, भावना, क्रतुः, पुरुषः, विधिः, अनुवादः।

## भूमिका

वैयाकरणानां मते वाक्यार्थबोधे कर्तृकर्मसङ्ख्याकालानाम् आख्यातार्थत्वेन[2] प्रतीतिर्भवति। तेषु कर्तरि प्रयोगे कर्तृरूपार्थस्य, कर्मणि प्रयोगे च कर्मरूपार्थस्य प्राधान्येन बोधो भवतीति व्यवस्थितिः। तद्रीत्या अनृतं न वदेदिति वाक्ये कर्तुः प्रकृत्यर्थवदनक्रियां प्रति प्राधान्यं लब्धम्, वदनक्रियायाश्च कर्त्रर्थत्वं सम्पन्नम्। क्रियायाः कर्त्रर्थत्वात् तन्निषेधस्यापि कर्त्रर्थत्वमिति रीत्या दर्शपूर्णमासप्रकरणे पठितस्य अनृतवर्जनस्य पुरुषार्थत्वमिति शाब्दिकानामाशयो लभ्यते। तच्च मीमांसकैर्विरुध्यते। तन्नये सङ्ख्या-काल-भावनानाम् आख्यातार्थत्वं स्वीक्रियते, तेषु भावनाया मुख्यत्वेन प्रतीतिर्भवति। तदा श्रुत्या क्रियारूपो यः क्रतुस्तदर्थत्वमनृतवदनस्य सिध्यति। यद्विषयिणी प्रवृत्तिस्तद्विषयाधीनः प्रतिषेधः, अतो भावनायामेव निषेधस्यान्वय इति व्यवस्था। एवञ्च श्रौतनिषेधस्य केवलक्रत्वङ्गत्वमेव सिध्यतीति मीमांसकानां सिद्धान्तः। अयं सर्वोऽपि

प्रपञ्च आख्यातार्थविचारसन्दर्भे एव प्रवृत्तः। तत्र शाब्दिकनये कर्त्राद्यर्थस्य आख्यातार्थत्वं स्वीकृतम्, अतोऽनृतवर्जनस्य पुरुषाङ्गत्वं समायातम्। मीमांसकनये तु भावनाया आख्यातार्थत्वं सिद्धान्तितम्, अतोऽनृतवर्जनस्य क्रत्वङ्गत्वं संलब्धमिति तत्त्वम्। इत्थं कर्त्रधिकरणे अनृतवदननिषेधस्य पुरुषाङ्गत्वमुत क्रत्वङ्गत्वमिति विषये शाब्दिकमीमांसकयोः विवादपरम्परा प्रसिद्धा। अनयोः कतरः स्वीकर्तव्य इत्ययं विषय एव प्रकृतप्रबन्धारम्भे मुख्यं बीजम्। अत्र प्रथमत उभयोः मते कर्त्रधिकरणस्य समन्वयप्रकारः प्रदर्शितः, ततो विमर्शः प्रस्तुतः। अन्ते च उचितानुचितविवेकेन सिद्धान्तो निरूपितः।

**मीमांसकाभिमतः कर्त्रधिकरणसमन्वयः**

तृतीयाध्यायस्य चतुर्थपादे भगवता जैमिनिना श्रुत्यादीनां त्रयाणां प्रमाणानां प्रकरणेन सह विरोधो भवति न वेति निर्णयार्थं सूत्राणि उपन्यस्तानि। अनृतवदनादीनि निषेधयन्तोऽनृतवदनप्रतिषेधा अत्रोदाहरणानि। तत्र शबरस्वामि-कुमारिलभट्टप्रभृतिभिः आख्यातस्य भावनार्थकत्वं विचारयद्भिः पूर्वपक्षसिद्धान्तोपन्यासेन कर्त्रधिकरणस्य विचारः कृतः। सम्प्रति कुमारिलभट्टदिशा पूर्वपक्षः प्रस्तूयते।

**कर्त्रधिकरणे पूर्वपक्षः**

कर्त्रधिकरणे "अकर्म क्रतुसंयुक्तं संयोगान्नित्यानुवादः स्यादि"ति[3] सूत्रव्याख्यानावसरे शबरस्वामिना पूर्वपक्षो व्याख्यातः, कुमारिलभट्टेन तस्यैव विस्तरेण वर्णनं कृतम्। अतस्तयोर्मध्ये मतवैचित्र्यं न किञ्चिद्दृश्यत इत्यवधेयम्। तत्रानृतवदनप्रतिषेधः पुरुषमात्रधर्मो विधिः, उत क्रतुयुक्तपुरुषधर्मोऽनुवादः अथवा शुद्धक्रतुधर्मोऽनुवाद इति त्रयः पूर्वपक्षा उपस्थापिताः।

**(१) केवलपुरुषार्थतया विधिः** - तत्र प्रथमतः सन्देहो भवति "नानृतं वदेदि"ति[4] निषेधः क्रत्वङ्गभूत उत पुरुषाङ्गभूत इति। यदि शाब्दिकरीत्या आख्यातस्य कर्त्रर्थकत्वं स्वीक्रियते तर्हि वदिधातुवाच्याया वदनक्रियायाः पुरुषाङ्गत्वं लब्धम्। प्रतिषिध्यमानस्य अनृतवदनस्य पुरुषधर्मतया तत्प्रतिषेधस्यापि पुरुषधर्मत्वेनैव निर्वाहः क्रियते, आकाङ्क्षावशात् प्रवृत्तिप्रतिषेधयोः समानविषयकत्वनियमात्। किञ्च प्रकृतः श्रौतप्रतिषेधः अनृतवदनवर्जनपरस्य स्मार्तप्रतिषेधस्य[5] मूलभूतः। ततश्चानृतवदनप्रतिषेधः अपूर्वतया पुरुषधर्मत्वाद् विधिरिति प्रथमः पूर्वपक्षो ज्ञायते।

**(२) क्रतुयुक्तपुरुषार्थतया अनुवादः** - अत्र कर्तुः आख्यातलभ्यत्वात् स श्रुतिगम्यः, क्रतुश्च प्रकरणबोध्यः। श्रुतिप्रकरणयोः श्रुतेर्बलवत्त्वाद् निषेधः पुरुषार्थ एव स्यादिति निरूपितम्। परन्तु प्रकृते श्रुतिप्रकरणयोः विरोधाभावात्ताभ्यां मिलिताभ्यां निषेधस्य क्रतुयुक्तपुरुषार्थत्वं सिध्यतीति विशेषः। अतः श्रुतिप्रकरणाभ्यां निषेधः क्रतुयुक्तपुरुषधर्म इति लब्धम्। किञ्चोपनयनमारभ्य मरणं

यावत् पुरुषेणानृतं वर्जनीयमिति प्रतिपादयति स्मृतिप्रतिषेधः, एतस्मिन्काले क्रतोरन्तर्भावात् तस्मिन्नपि स्मृतिप्रतिषेधः प्रसक्त एव। अतः प्रकृतः श्रुतिप्रतिषेधः न विधिः किन्तु स्मृतिप्रतिषेधस्य अनुवाद एवेति समायातम्। ततश्च क्रतुयुक्तपुरुषधर्मतयायं श्रुतिप्रतिषेधोऽनुवाद इति द्वितीयः पूर्वपक्षो बोध्यः।

**(३) केवलक्रत्वर्थतया अनुवादः** - आख्यातार्थो भावनेति मीमांसकानां सिद्धान्तः। अतो वदेदित्यत्र आख्याताद् भावनाया एव वाच्यत्वेन प्रतीतिर्भवति। एवञ्चाख्यातश्रुत्या अनृतवदनाभावस्य उपस्थितिः, तस्य च प्रकरणप्रमाणेन क्रतुमात्रधर्मत्वमिति तृतीयपूर्वपक्षः। अत्राख्यातस्य भावनार्थकत्वात्प्रथमतो भावनाया एवोपस्थितिर्भवति तदनन्तरमर्थतः कर्तृरूपार्थः प्रतीयते। एवं वाच्यस्तरे उपकार्यत्वेन प्रकरणप्रमाणलब्धस्य क्रतोरेव प्रतीतिर्भवति। अतो निषेधस्य प्रकरणप्रमाणेन क्रतुमात्रधर्मत्वं सिध्यतीत्याशयः। सार्वत्रिकस्य स्मार्तप्रतिषेधस्य क्रतावपि प्राप्तिसम्भवात् तदनुवादत्वेनैव प्रकृतः श्रुतिप्रतिषेधः परामृश्यते। एवञ्च केवलक्रतुधर्मतयायं श्रौतप्रतिषेधोऽनुवाद इति तृतीयः पूर्वपक्षो बोध्यः।

इत्थं कर्त्रधिकरणे त्रयः पूर्वपक्षा उपन्यस्ताः। अत्र निषेधस्य पुरुषमात्रधर्मत्वमथवा क्रतुयुक्तपुरुषधर्मत्वमुत क्रतुमात्रधर्मत्वमिति संशयो भवति। तत्रापि अनृतवर्जनस्य विधित्वमथवा अनुवादत्वमित्यस्मिन् विषयेऽपि सन्देहावसरः प्रतिपादितः। ततश्च श्रुतिप्रतिषेधस्यानुवादत्वं केवलक्रत्वर्थत्वञ्चेति अन्ततः पूर्वपक्षिणां मतं लभ्यते।

**कर्त्रधिकरणे सिद्धान्तः**

महर्षिजैमिनिना "विधिर्वा संयोगान्तरादि"ति[6] निषेधस्य विधित्वप्रतिपादकं सूत्रमुपन्यस्तम्। तत्र भट्टपादप्रभृतिभिः सिद्धान्तरूपेण त्रयः पक्षा निरूपिताः, त्रिष्वपि पक्षेषु संयोगान्तरात् श्रुतिप्रतिषेधस्य विधित्वमेव प्रतिपाद्यते। पुरुषाङ्गत्वेन विधिः, क्रतुयुक्तपुरुषाङ्गत्वेन विधिः क्रतुमात्रधर्मत्वेन विधिश्चेति तत्रत्यानां त्रयाणां पक्षाणां सङ्ग्रहः।

**(१) केवलपुरुषार्थतया विधिः** - तत्र प्रथमः सिद्धान्तः केवलपुरुषार्थतया श्रुतिनिषेधस्य विधित्वमिति। शाब्दिकरीत्या आख्यातस्य कर्त्राद्यर्थकत्वाद् श्रुतिप्रतिषेधस्य पुरुषमात्रेण सम्बन्धः सिध्यति, अनृतवर्जनवाक्ये च निषेधस्य केवलपुरुषार्थत्वं लभ्यते। स्मृतिप्रतिषेधे सत्यं वदेदित्येवम् अनुष्ठेयतयोपदेशावसरे अनृतं न वदेदिति निर्दिष्टम्। अनृतवर्जनस्यानुष्ठेयत्वासम्भवात्तत्र नञः पर्युदासार्थकत्वं स्वीक्रियते। तदा स्मार्तनिषेधस्य अननृतवदनसङ्कल्पपरत्वं लब्धम्। पुरुषस्य च नियमानुष्ठानेन सम्बन्धः सिध्यति। परन्तु श्रुतिप्रतिषेधे अनुष्ठेयवाचकानां व्रतादिशब्दानामभावाद् निषेधस्य कर्तव्यत्वेनोपदेशो न सम्भवति। अतोऽनृतं वर्जनीयमिति पदार्थप्रतिषेधेनैव पुरुषस्य सम्बन्धः सिध्यति। ततश्च स्मृतौ नियमानुष्ठानेन पुरुषसम्बन्धः, श्रुतौ पदार्थप्रतिषेधेन पुरुषसम्बन्ध इति संयोगान्तरात् सम्बन्धान्तरात् श्रौतप्रतिषेधस्य विधित्वमिति सिद्धान्तितम्।

**(२) क्रतुयुक्तपुरुषार्थतया विधिः** – आख्यातस्य कर्त्रर्थकत्वे श्रुतिप्रमाणेन कर्तृरूपार्थस्योपस्थितिर्भवति। प्रकरणप्रमाणेन च क्रतुरूपार्थस्योपस्थितिः। प्रकृते श्रुतिप्रकरणयोरविरोधात् श्रौतनिषेधस्य क्रतुयुक्तपुरुषार्थत्वं, स्मृतिप्रतिषेधानुवादकत्वमिति पूर्वं प्रतिपादितम्। अथ न संशयं प्रपद्येतेत्यादौ स्मृतौ कर्तव्यार्थकानां व्रतादिशब्दानामुपक्रमाभावाद् नञः प्रसज्यप्रतिषेधार्थकत्वमेव सिध्यति। तदा स्मार्तनिषेधस्य निषेधत्वमेव, न तु अननृतवदनसङ्कल्पपरत्वम्। एवञ्च श्रुतिस्मृत्योरुभयत्रापि पुरुषसम्बन्धः पदार्थप्रतिषेधेनैवेति श्रौतनिषेधस्यानुवादत्वापत्तिः। अतः क्रतुयुक्तपुरुषार्थत्वात् संयोगान्तरात् श्रुतिप्रतिषेधस्य विधित्वमिति द्वितीयः पक्षः।

**(३) केवलक्रत्वर्थतया विधिः** – मीमांसकमते आख्यातस्य भावनार्थकत्वात् श्रुतिप्रतिषेधस्य क्रतुमात्रधर्मत्वमिति तृतीयः पक्षो निरूपितः। अत्रापि निषेधस्य विधित्वं निरूप्यते। स्मार्तप्रतिषेधस्य केवलपुरुषधर्मत्वम्, श्रौतस्य तु क्रतुमात्रधर्मत्वम्। अत एकत्र निषेधस्य पुरुषमात्रेण सम्बन्धः, अपरत्र केवलक्रतुनेति सम्बन्धान्तरात् संयोगान्तरात् श्रुतिप्रतिषेधो विधिरिति तृतीयपक्षस्य सारः।

इत्थं भट्टपादादिभिः कर्त्रधिकरणे सिद्धान्तरूपेण त्रयः पक्षा विन्यस्ताः। त्रिष्वपि पक्षेषु संयोगान्तराद्धेतोः श्रुतिप्रतिषेधस्य विधित्वं प्रतिपादितम्। श्रुतिप्रतिषेधस्य स्मृतिनिषेधानुवादकत्वे स्मृतौ यत्प्रायश्चित्तं निर्धारितं तस्य क्रतुविषयेऽपि प्रवृत्तिः स्यात्, श्रौतप्रायश्चित्तस्य च प्राप्तिर्न स्यात्। तन्नेष्टम्, अतः श्रुतिप्रतिषेधस्य विधित्वं प्रतिपाद्यते। ततः क्रतौ श्रुतिप्रतिषेधातिक्रमे क्रतुपुरुषयोरुभयोरपि वैगुण्यमिति तत्परिहाराय सारस्वतेष्टिरूपं श्रौतमेव प्रायश्चित्तं प्राप्नोतीति विधित्वपक्षे फलं बोध्यम्।

**जञ्जभ्यमानाधिकरणपरिचयः**

“जञ्जभ्यमानोऽनुब्रूयान्मयि दक्षक्रतू[7]” इति वाक्यमाश्रित्य जञ्जभ्यमानाधिकरणं प्रवृत्तम्। आचार्यनागेशेन कर्त्रधिकरणस्थस्य विषयस्य समन्वयाय जञ्जभ्यमानाधिकरणमपि उपयोजितम्। तत्र मन्त्रजपस्य केवलपुरुषार्थत्वमुत क्रतुयुक्तपुरुषार्थत्वमिति विचार्यते। प्रसङ्गप्राप्तत्वात्सम्प्रति मीमांसकदिशा जञ्जभ्यमानाधिकरणस्य संक्षिप्तः परिचयः प्रदीयते।

**जञ्जभ्यमानाधिकरणे पूर्वपक्षः**

तत्र जञ्जभ्यमान इति कर्तृशानजन्तघटितवाक्यप्रमाणेन मन्त्रजपस्य केवलपुरुषार्थत्वमिति पूर्वपक्षः। “अहीनवत्पुरुषस्तदर्थत्वादि”ति[8] तत्र पूर्वपक्षोपपादकं सूत्रम्। यद्यपि प्रकरणप्रमाणेन मन्त्रजपस्य क्रत्वङ्गत्वं प्राप्नोति तथापि मन्त्रजपो ज्योतिष्टोमप्रकरणात्पृथक्कृत्य वाक्यप्रमाणेन पुरुषमात्रे सम्बध्यत इति तदाशयः। अत्र प्रकरणोल्लङ्घनस्य विषये दृष्टान्तत्वेन

ज्योतिष्टोमप्रकरणपठितं ‘‘तिस्र एव साह्नस्योपसदो द्वादशाहीनस्ये’’ति[9] वाक्यम् उदाहृतम्। अत्र साह्नेति ज्योतिष्टोमस्य छान्दसं रूपम्, उपसदः इष्टिविशेषः। अस्मिन्वाक्ये प्रकरणप्रमाणेन द्वादशोपसत्कत्वस्य ज्योतिष्टोमाङ्गत्वं प्राप्तम्, श्रुतिप्रमाणेन च द्व्यहादिद्वादशाहान्ताहर्गणसाध्यक्रत्वङ्गत्वं प्राप्तम्। ततः श्रुतिप्रकरणयोः श्रुतेर्बलवत्त्वाद् द्वादशोपसत्कत्वस्य ज्योतिष्टोमाङ्गत्वं निर्णीतम्। एवं जञ्जभ्यमानाधिकरणेऽपि वाक्यप्रकरणयोः वाक्यप्रमाणस्य बलवत्त्वाद् मन्त्रजपस्य केवलपुरुषार्थत्वं सिध्यतीति पूर्वपक्षिणामाशयः।

**जञ्जभ्यमानाधिकरणे सिद्धान्तः**

अविरुद्धाभ्यां वाक्यप्रकरणाभ्यां मिलिताभ्यामेव मन्त्रजपस्य क्रतुयुक्तपुरुषाङ्गत्वमिति जञ्जभ्यमानाधिकरणे सिद्धान्तः। ‘‘प्रकरणविशेषाद्वा तद्युक्तस्य संस्कारो द्रव्यवदि’’ति[10] तत्र सिद्धान्तोपपादकं सूत्रम्। अत्र श्रुत्या मन्त्रजपस्य पुरुषार्थत्वं, प्रकरणेन च क्रत्वर्थत्वं प्राप्तम्। अनयोर्विरोधाभावादाभ्यां मिलिताभ्यां मन्त्रवचनस्य क्रतुयुक्तपुरुषार्थत्वं सिध्यति। सत्येव विरोधे बलाबलभावसम्भवात् प्रकृते चाविरोधात् श्रुतिप्रकरणाभ्यां मन्त्रजपस्य क्रतुयुक्तपुरुषार्थत्वमेव स्वीकर्तव्यमित्याशयः। ‘‘व्रीहीन् प्रोक्षति[11]’’ इति स्थले श्रुत्या प्रोक्षणस्य व्रीह्यर्थत्वम्, प्रकरणेन क्रत्वर्थत्वं प्राप्तम्। अविरोधाद् मिलिताभ्यां ताभ्यां क्रतुयुक्तव्रीहीणामेव प्रोक्षणविधिः सिध्यति। इत्थं जञ्जभ्यमानाधिकरणेऽपि मन्त्रवचनात्मकः संस्कारो न पुरुषमात्रार्थः, अपि तु क्रतुयुक्तपुरुषार्थ एवेति सिद्धान्तिनामाशयः।

**विशेषः** - मीमांसकैः प्रधानतः अनृतवर्जनस्य विधित्वमुत अनुवादत्वमिति कर्त्रधिकरणे विचार्यते। मन्त्रजपस्य केवलपुरुषार्थत्वमुत क्रतुयुक्तपुरुषार्थत्वमिति च जञ्जभ्यमानाधिकरणे आलोच्यते। ‘‘नानृतं वदेदि’’ति[12] निषेधः कर्त्रधिकरणस्य विषयवाक्यम्, अत एतदधिकरणं निषेधपरम्। ‘‘जञ्जभ्यमानोऽनुब्रूयान्मयि दक्षक्रतू[13]’’ इति विधिः जञ्जभ्यमानाधिकरणस्य विषयवाक्यम्, अतस्तदधिकरणं विधिपरम्। कर्त्रधिकरणे श्रुतिप्रकरणयोः विरोधो भवति न वेति विचार्यते, जञ्जभ्यमानाधिकरणे च वाक्यप्रकरणयोः विरोधो विचार्यत इति मीमांसकमते उभयोरधिकरणयोः विषयभेदः।

**नागेशाभिमतः कर्त्रधिकरणसमन्वयः**

शाब्दिकानां मते आख्यातस्य कर्त्राद्यर्थकत्वमेव सिद्धान्तितम्। परन्तु तथा स्वीकारे कर्त्रधिकरणे अनृतवर्जनस्य पुरुषमात्रधर्मत्वं स्यात्, अनृतवदनेन क्रतोः वैगुण्यं न स्यादिति अनिष्टापत्तिः। अत आख्यातस्य भावनार्थकत्वं स्वीकर्तव्यमिति मीमांसकानामाशयः। अस्मिन्प्रसङ्गे आख्यातस्य कर्त्राद्यर्थकत्वेऽपि कर्त्रधिकरणे न दोष इति नागेशाचार्येण प्रतिपाद्यते। आख्यातार्थविचारप्रसङ्गे तेन कर्त्रधिकरणं जञ्जभ्यमानाधिकरणमिति अधिकरणद्वयस्य युगपत्समन्वयो व्याख्यातः। तत्र जञ्जभ्यमानाधिकरणस्थं सूत्रद्वयम् आश्रित्य केवलपुरुषार्थत्वमुत क्रतुयुक्तपुरुषार्थत्वमिति

निषेधस्य अङ्गाङ्गिभावविषये समन्वयः प्रदर्शितः। कर्त्रधिकरणस्थं सूत्रद्वयमाश्रित्य विधित्वमुतानुवादत्वमिति श्रौतनिषेधस्य स्वरूपविषये विचारः कृतः। इत्थं नागेशदिशा पूर्वपक्षसिद्धान्तयोः प्रकारद्वयेन विन्यासः सम्भवतीति विशेषः। सम्प्रति अङ्गिविषये पूर्वपक्षसिद्धान्तयोः वर्णनं क्रियते।

**अङ्गिनिर्णायकः पूर्वपक्षः**

उभयत्राप्यधिकरणे प्रथमतो विधिनिषेधयोः केवलपुरुषार्थत्वम् आशङ्कितम्, तदनु क्रतुयुक्तपुरुषार्थत्वं सिद्धान्तितम्। आख्यातस्य कर्त्रर्थकत्वात् अनृतवर्जनप्रसङ्गे निषेधस्य केवलपुरुषार्थत्वम्, जञ्जभ्यमानाधिकरणे च मन्त्रजपविधेः पुरुषमात्रधर्मत्वमिति आशङ्कितम्। यद्यपि प्रकरणप्रमाणेनानयोः क्रत्वर्थत्वमेव लभ्यते, तथापि श्रुतिवाक्ययोः प्रकरणापेक्षया बलवत्त्वाद् विधिनिषेधयोः केवलपुरुषार्थत्वं सिध्यति। ततः प्रकरणं हित्वा प्रबलाभ्यां श्रुतिवाक्याभ्याम् अनृतवर्जनमन्त्रजपयोः केवलपुरुषार्थत्वं सम्पद्यते। यथा ज्योतिष्टोमप्रकरणे द्वादशोपसत्कत्वं ज्योतिष्टोमप्रकरणात् पृथक्कृत्य द्विरात्राद्यहीनेषु सम्बध्यते तथात्र कर्त्रधिकरणे जञ्जभ्यमानाधिकरणे च यथाक्रमम् अनृतवर्जनं मन्त्रजपश्च प्रकरणात् पृथक्कृत्य पुरुषे सम्बध्यते। प्रबलाभ्यां श्रुतिवाक्याभ्याम् अनृतवर्जन-मन्त्रजपयोः केवलपुरुषार्थत्वमेव सिध्यति न तु क्रत्वङ्गत्वमपीति भावः। अतोऽधिकरणद्वयेऽपि केवलपुरुषार्थत्वमिति पूर्वपक्षस्य तुल्यत्वेन “अहीनवत्पुरुषधर्मस्तदर्थत्वात्[14]” इत्येकमेव अङ्गिविषये पूर्वपक्षोपपादकं सूत्रमिति आचार्यनागेशस्याशयः।

**अङ्गिनिर्णायकः सिद्धान्तपक्षः**

“प्रकरणविशेषाद्वा तद्युक्तस्य संस्कारो द्रव्यवदि”ति[15] जञ्जभ्यमानाधिकरणस्थं सूत्रमत्र सिद्धान्तोपपादकत्वेन प्रतिपादितं नागेशाचार्येण। श्रुतिप्रकरणाभ्यां क्रतुयुक्तपुरुषस्यैव अनृतवर्जनानुवचनादिसंस्कारो विधीयत इति तदाशयः। यद्यपि श्रुतिप्रमाणेन अनृतवर्जनस्य वाक्यप्रमाणेन च मन्त्रजपस्य केवलपुरुषार्थत्वं लभ्यते, तथापि विरोधाभावात् श्रुतिप्रकरणाभ्यां वाक्यप्रकरणाभ्याञ्च क्रतुयुक्तपुरुषं प्रत्येव अनृतवर्जनस्य मन्त्रजपस्य चाङ्गत्वं बोध्यमिति भावः। इत्थम् अनृतवर्जनस्य क्रतुयुक्तपुरुषार्थत्वमिति नागेशाभिमतः सिद्धान्तो बोध्यः।

**स्वरूपनिर्णायकः पूर्वपक्षः**

कर्त्रधिकरणोपात्तस्य अनृतवर्जनात्मकस्य श्रौतप्रतिषेधस्य क्रतुयुक्तपुरुषार्थत्वमिति सिद्धान्तितम्। अस्य स्मृतिप्रतिषेधानुवादत्वमिति नागेशाभिमतः पूर्वपक्षः। “अकर्म क्रतुसंयुक्तं संयोगान्नित्यानुवादः स्यादि”ति[16] पूर्वपक्षोपपादकं सूत्रं बोध्यम्। क्रतुसंयुक्तं दर्शपूर्णमासप्रकरणे पठितम्, अकर्म कर्मनिषेधकम् अनृतवर्जनवाक्यम्, तस्य अनारभ्याधीतेन स्मार्तेन

अनृतवर्जनवाक्येन संयोगात् समानाकारत्वात्क्रतौ नित्यसिद्धप्रतिषेधस्य अनुवादः स्यादिति सूत्रस्याशयः। श्रौतस्य स्मार्तस्य चानृतवर्जनवाक्यस्य शब्दतोऽर्थतश्च समानाकारकत्वात् श्रुतिप्रतिषेधेन क्रतौ नित्यसिद्धस्य प्रतिषेधस्य अनुवाद एव स्यान्न तु विधिः। स्मृतिशास्त्रेषु उपनयनप्रभृति यावज्जीवं विहितम् अनृतवर्जनं दर्शपूर्णमासयोरपि नित्यं प्राप्तम्, अतः दर्शपूर्णमासप्रकरणपठितेन अनृतवर्जनवाक्येन अयं स्मृतिप्रतिषेधः अनूद्यत इति पूर्वपक्षः।

अनुवाद्यानुवादकयोश्च समानविषयकत्वात् स्मृतौ यथा प्रायश्चित्तं निर्धारितं तादृशं प्रायश्चित्तं क्रतावपि अनृतवदने आचरणीयमिति समायातम्। अनेन स्मार्तम् आचमनादिकं प्रायश्चित्तमेव क्रतुदशायाम् आचरणीयं न तु सारस्वतेष्टिरूपं श्रौतं प्रायश्चित्तमित्याशयः फलति।

**स्वरूपनिर्णायकः सिद्धान्तपक्षः**

श्रौतप्रतिषेधस्य विधित्वमिति सिद्धान्तपक्षः। शब्दशक्त्या स्मार्तप्रतिषेधस्य नियमपरत्वम्, श्रौतस्य निषेधपरत्वमिति भेदादेव श्रौतप्रतिषेधस्य विधित्वं साधनीयमिति भावः। "विधिर्वा संयोगान्तरादि"ति[17] सिद्धान्तोपपादकं सूत्रम्। नागेशमतेऽत्र संयोगान्तरादित्यस्य शब्दशक्तिभेदादिति तात्पर्यम्। तथाहि, स्मृतिशास्त्रे सत्यं ब्रूयादित्यादिना स्मृतिवाक्येन कर्तव्यत्वेन धर्म उपदिश्यते। तत्र स्मार्तप्रतिषेधस्य कर्तव्यत्वासम्भवाद् नञः पर्युदासरूपार्थः स्वीक्रियते। अनया रीत्या स्मृतिप्रतिषेधस्य अननृतवदनसङ्कल्पपरत्वं सम्पद्यते। श्रौतप्रतिषेधस्य विषये तथा प्रसङ्गो नास्ति। अतस्तत्र नञः प्रसज्यप्रतिषेधरूपमर्थं स्वीकृत्य साक्षान्निषेध एव विधीयते। एवं संयोगान्तरात् शब्दशक्तिभेदात् श्रुतिप्रतिषेधो विधिरिति आशयः।

वस्तुतस्तु शब्दशक्तिस्वाभाव्यात् श्रौतप्रतिषेधस्य विधित्वमिति नागेशाचार्यस्य तात्पर्यम्। प्रकृते शब्दशक्तिमनुसृत्य नागेशाचार्येण संयोगान्तरशब्दस्य चतुर्धार्थो व्याख्यातः, ते च - क्रतुप्रकरणपाठात्, व्रतोपक्रमासम्भवात्, अनुवादफलाभावात् प्रयोजनान्तरसद्भावादिति च। एवमेभ्यः कारणेभ्यः श्रौतप्रतिषेधस्य विधित्वमिति तन्मते सिद्धान्तो बोध्यः।

**अयमत्र सारः**

**नागेशाशयः** - अत्र "नानृतं वदेदि"ति[18] क्रतुप्रकरणपठितः श्रौतनिषेधः समानाकारत्वात् स्मार्तनिषेधस्यानुवाद इति पूर्वपक्षः। ततः संयोगान्तरात् शब्दशक्तिभेदाद् विध्यन्तरमिदमिति सिद्धान्तः। ततश्च अनृतवदनप्रतिषेधस्य मन्त्रवचनस्य चोभयोरपि केवलपुरुषार्थत्वमिति पूर्वपक्षः। उभयोरपि क्रतुयुक्तपुरुषार्थत्वमिति तत्र सिद्धान्तः। केवलपुरुषार्थत्वमिति पूर्वपक्षेणोपस्थापिते अहीनवदादिदृष्टान्ते "व्यपदेशादपकृष्येत[19]" इति बाधकसूत्रम्। समानविषयत्वे सति विरोधः, विरोधे सत्येव बाध्यबाधकभाव इति तस्य तात्पर्यार्थः। अयमेव आचार्यनागेशसम्मतो जैमिनिसूत्रसमन्वयो बोध्यः।

**मीमांसकाशयः** - नव्यमीमांसकानां मते तु पूर्वपक्षसिद्धान्तपक्षयोः भिन्नरीत्या विन्यासः क्रियते। तत्र कर्त्रधिकरणे प्रथमतोऽनृतप्रतिषेधः किं पुरुषधर्मतया विधिः उत क्रतुयुक्तपुरुषधर्मतया अनुवादः अथवा, केवलक्रत्वर्थत्वेन अनुवाद इति पूर्वपक्षः। तत्र वदेदिति आख्यातेन भावनोपस्थित्या श्रुत्या प्रकरणस्य बाधाद् अनृतवर्जनस्य केवलक्रत्वर्थत्वेन अनुवादत्वमिति पूर्वपक्षिणामाशयः। ततश्च संयोगान्तरात् प्रयोजनान्तराद् अनृतवदननिषेधस्य शुद्धक्रत्वर्थतया विधित्वमिति सिद्धान्तपक्षः। तदनन्तरं जञ्जभ्यमानाधिकरणे मन्त्रजपस्य केवलपुरुषार्थत्वमिति पूर्वपक्षः। वाक्यप्रकरणयोरविरोधाद् मिलिताभ्यां ताभ्यां मन्त्रजपस्य क्रतुयुक्तपुरुषाङ्गत्वमिति सिद्धान्तः। श्रुतिप्रमाणेन आख्यातार्थभूतभावनाया एवोपस्थितेः कर्त्रधिकरणे प्रकरणप्रमाणेन क्रतुं प्रत्येव अनृतवर्जनस्याङ्गत्वबोधनात् निषेधस्य केवलक्रत्वर्थत्वं सिध्यति। जञ्जभ्यमानाधिकरणे तु वाक्येन प्रकरणस्य बाधाभावेन मन्त्रजपस्य वाक्यप्रकरणाभ्यां क्रतुयुक्तपुरुषधर्मत्वमिति नव्यमीमांसकानामाशयः।

**विमर्शः**

कर्त्रधिकरणे श्रुतिप्रतिषेधस्य केवलक्रत्वर्थत्वेन विधित्वमिति मीमांसकानां सिद्धान्तः। नागेशादीनां मते तु निषेधस्य क्रतुयुक्तपुरुषार्थत्वेन विधित्वमिति सिद्धान्तः। एवं सिद्धान्तविरोधात् समन्वयोऽपि विरुध्यते। आख्यातार्थविषये मतभेदादेव अयं महान् विवादप्रपञ्च आरभ्यत इति बोध्यम्। सम्प्रति उभयोरपि मतयोः विमर्शः प्रस्तूयते।

(१) अत्र शाब्दिकरीत्याख्यातस्य कर्त्रर्थकत्वे स्वीकृते कर्त्रधिकरणे श्रुत्या प्रकरणस्य बाधादनृतवर्जनस्य केवलपुरुषधर्मतापत्तिः स्यात्। तथा सति क्रतुवैगुण्यं न प्राप्येत, अतः कर्तुराख्यातावाच्यत्वं प्रतिपादयन्ति मीमांसकाः। एवम् अनृतवर्जनस्य केवलक्रतुधर्मत्वसम्पादनाय तैः आख्यातार्थो भावना, न कर्तेति व्यवस्थीयते। तदा श्रुतिप्रतिषेधस्य क्रत्वर्थत्वं लभ्यत इति सिध्यति क्रतुवैगुण्यप्रतिपादनम्।

(२) आख्यातस्य कर्त्रर्थकत्वेन श्रौतस्मार्तयोः उभयोरपि प्रतिषेधयोः केवलपुरुषार्थत्वे श्रुतिप्रतिषेधस्य अनुवादकत्वापत्तिः। तदा क्रतुविषये पुरुषवैगुण्यपरिहाराय स्मार्तप्रायश्चित्तस्यैव प्रवृत्तिः स्यान्न श्रौतस्येति मीमांसकैः शाब्दिकमते दोष आशङ्कितः। अत आख्यातस्य भावनार्थकत्वव्याख्यानेन मीमांसकैः श्रुतिप्रतिषेधस्य केवलक्रत्वर्थत्वं प्रतिपादितम्। ततश्च अनृतवदनजन्यं क्रतुवैगुण्यं प्रतिपादनीयमिति संयोगान्तरात् प्रयोजनान्तरात् श्रुतिप्रतिषेधो विधिरिति मीमांसकैः निरूपितम्।

(३) मीमांसकैः श्रौतनिषेधस्य केवलक्रत्वर्थत्वे क्रतुविषयेऽपि वैगुण्यप्रतिपादनमिति प्रथमं प्रयोजनमुक्तम्। तच्च शाब्दिकमतेऽपि सिध्यतीति नागेशादयः। आख्यातस्य कर्त्रर्थकत्वात् श्रुत्या निषेधस्य पुरुषार्थत्वं प्राप्नोति, प्रकरणप्रमाणेन च क्रत्वर्थत्वं प्राप्नोति। अत्र श्रुतिप्रकरणयोः

विरोधाभावात् ताभ्यां मिलिताभ्यां निषेधस्य क्रतुयुक्तपुरुषार्थत्वमेव सम्पद्यते। अतोऽनृतवदने यथा पुरुषस्य वैगुण्यं तथा क्रतोरपीति सम्भवति क्रतुविषये वैगुण्यप्रतिपादनम्। अतः क्रतुवैगुण्यप्रतिपादनाय श्रौतनिषेधस्य केवलक्रत्वर्थत्वप्रतिपादनम्, तदर्थञ्च आख्यातस्य भावनार्थकत्वनिरूपणम् अयुक्तमिति नागेशस्याशयः।

(४) श्रुतिनिषेधस्य विधित्वमिति निषेधस्य केवलक्रत्वर्थत्वे द्वितीयं प्रयोजनमुक्तं मीमांसकैः । तदपि आख्यातस्य कर्त्रर्थकत्वे सिध्यतीति नागेशाचार्यो विचारयति। तथाहि, "विधिर्वा संयोगान्तरादि"ति[20] सूत्रे संयोगान्तरशब्दस्य प्रयोजनान्तरत्वेन व्याख्यानं कृतं मीमांसकैः। नागेशमते त्वस्य शब्दशक्तिभेदादित्यर्थः। स्मृतिशास्त्रे सत्यं ब्रूयादित्यादिना स्मृतिवाक्येन कर्तव्यत्वेन धर्म उपदिश्यते। तत्र स्मार्तप्रतिषेधस्य कर्तव्यत्वासम्भवाद् नञः पर्युदासरूपार्थमादाय स्मृतिप्रतिषेधस्य अननृतवदनसङ्कल्पपरत्वं सम्पद्यते। श्रौतप्रतिषेधस्य विषये कर्तव्यार्थकव्रतादिशब्दानां प्रयोगो नास्ति। अतोऽत्र नञः प्रसज्यप्रतिषेधरूपमर्थं स्वीकृत्य साक्षान्निषेध एव विधीयते। एवं संयोगान्तरात् शब्दशक्तिभेदादेव श्रुतिप्रतिषेधस्य विधित्वं सिध्यति। तदर्थं प्रतिषेधस्य केवलक्रत्वर्थत्वप्रतिपादनम् अयुक्तमिति भावः।

**सिद्धान्तः**

(१) जञ्जभ्यमानाधिकरणप्रामाण्येन अनृतवर्जनस्य क्रतुयुक्तपुरुषार्थत्वं सिद्धम्। आख्यातस्य कर्त्रर्थकत्ववादिनां शाब्दिकानां मतेऽपि श्रौतप्रतिषेधस्य क्रतुयुक्तपुरुषार्थत्वमेव लभ्यत इति न क्वापि विरोधापत्तिः। मीमांसकानां मते आख्यातस्य भावनार्थकत्वात् श्रुतिप्रतिषेधस्य केवलक्रत्वर्थत्वं प्राप्नोतीति तन्मते जञ्जभ्यमानाधिकरणस्य विरोधापत्तिः।

(२) मीमांसकैः आख्यातस्य भावनार्थकत्वं प्रतिपादितम्, कृताञ्च कर्त्रर्थकत्वं स्वीकृतम्। एवं वैषम्यादेव कर्त्रधिकरणे निषेधस्य केवलक्रत्वर्थत्वम्, जञ्जभ्यमानाधिकरणे च विधेः क्रतुयुक्तपुरुषार्थत्वमिति भिन्नरीत्या निर्वाहः क्रियते। शाब्दिकैस्तु उभयत्रापि कर्तुरेव वाच्यत्वं व्याख्याय विधिनिषेधयोः क्रतुयुक्तपुरुषार्थत्वमेव प्रतिपाद्यत इति तन्मते लाघवम्।

(३) अत्र शाब्दिकरीत्या निषेधस्य क्रतुयुक्तपुरुषार्थत्वस्वीकारे मीमांसकमतविरोधापत्तिर्न शङ्कनीया, मीमांसकमतेऽपि निषेधस्य अन्ततः क्रतुयुक्तपुरुष एव पर्यवसानात्। तथाहि, भट्टपादादिरीत्या आख्यातस्य भावनार्थकत्वाद् वाच्यस्तरे अनृतवर्जनस्य शुद्धक्रत्वर्थत्वम्। ततो भावनया कर्तुराक्षेपात् लक्ष्यस्तरे तु निषेधस्य क्रतुयुक्तपुरुषार्थत्वमिति निर्वाहः। तन्मते कर्त्रधिकरणे लक्षणया निषेधस्य पुरुषाङ्गत्वम्, जञ्जभ्यमानाधिकरणे च वाक्यप्रमाणेन विधेः पुरुषाङ्गत्वमिति भावः। अतः शाब्दिकरीत्या श्रौतनिषेधस्य क्रतुयुक्तपुरुषार्थत्वप्रतिपादने न कश्चित् सिद्धान्तविरोधः। ततश्च क्रतुयुक्तपुरुषार्थत्वेनैव यद्युभयत्र निर्वाहस्तर्हि मीमांसकैः कृत्प्रत्ययवद् आख्यातस्यापि कर्त्रर्थकत्वं स्वीकर्तव्यमिति ज्ञेयम्।

(४) आख्यातस्य कर्त्रर्थकत्वेन श्रौतनिषेधस्य केवलपुरुषार्थत्वात् अनुवादत्वापत्तिः स्यादित्यतो मीमांसकैः आख्यातस्य भावनार्थकत्वं स्वीक्रियते। परन्तु केवलपुरुषार्थत्वेऽपि शब्दशक्तिभेदान्निषेधस्य विधित्वं सम्भवतीति विशेषः। अतः शब्दशक्तिस्वाभाव्येनैव विधित्वसम्भवे प्रयोजनान्तरसद्भावमात्रेण श्रुतिप्रतिषेधस्य विधित्वप्रतिपादनम्, तदर्थञ्च आख्यातस्य भावनार्थकत्वप्रतिपादनम् अनुचितमिति बोध्यम्।

(५) इत्थं पर्यालोचनया भट्टपादादीनां नव्यमीमांसकानामपेक्षया नागेशाचार्यस्यैव मतं युक्ततरमिति प्रतिभाति। ततश्च नव्यमीमांसककृतः अधिकरणविभागः, निषेधस्य केवलक्रत्वर्थत्वसिद्धान्तः, तत्समर्थनाय आख्यातस्य कर्तृवाचित्वविरोध इति सर्वोऽपि प्रपञ्चः सततमसङ्गत एवेति प्रकृतप्रबन्धे सिद्धान्तो लभ्यते।

**उपसंहारः**

कर्त्रधिकरणे आख्यातं कर्तृवाचकमिति शाब्दिकमतं तिरस्कृत्य मीमांसकैः आख्यातार्थो भावनेति सिद्धान्तितम्। अत्राख्यातस्य भावनार्थकत्वानुकूल्येनैव पूर्वपक्षसिद्धान्तयोः मतविन्यासः कृतः। अत एतदधिकरणं मीमांसकानां हृदयभूतम्। परन्तु शाब्दिकैः आख्यातस्य कर्त्रर्थकत्वानुकूल्येनैव तस्याधिकरणस्य व्याख्यानं क्रियते। कौण्डभट्टादिभिर्वैयाकरणैः कर्त्रधिकरणे श्रौतप्रतिषेधस्य क्रतुयुक्तपुरुषार्थत्वं प्रतिपाद्यैव विरतम्, परन्तु तथा स्वीकारे तत्रत्यानां सूत्राणां पूर्वपक्षसिद्धान्तयोश्च समन्वयः कथं स्यादिति नागेशेन विशेषतः प्रदर्शितमिति परिलक्ष्यते। अत्र प्रबन्धे कुमारिलभट्टदिशा नागेशदिशा च कर्त्रधिकरणस्य समन्वयः कथं स्यादित्येव प्रधानतो विचार्यते। प्रसङ्गप्राप्तत्वाद् जञ्जभ्यमानाधिकरणस्यापि विचारः प्रस्तुतः। अत्र एकैकस्यापि विचारबिन्दोः युक्तत्वायुक्तत्वे विद्वांस एव प्रमाणमिति विनिवेद्य अत्रैव विरम्यत इति शम्।

**सन्दर्भसूची**

[1] तैत्तिरीयब्राह्मणम्-१/५/३/१।
[2] अत्राख्यातशब्दस्य तिङ्-प्रत्ययरूपार्थे व्यवहारो बोध्यः।
[3] जैमिनिसूत्रम्-०३/०४/२८।
[4] तैत्तिरीयब्राह्मणम्-१/५/३/१।
[5] "सत्यं ब्रूयात् प्रियं ब्रूयात् ... ॥" इत्यादिः अनृतवर्जनपरः स्मृतिप्रतिषेधः।
[6] जैमिनिसूत्रम्-०३/०४/१९।
[7] दर्शपूर्णमासप्रकरणे पठितमेतद्वाक्यम्।
[8] जैमिनिसूत्रम्-०३/०४/२०।
[9] तैत्तिरीयसंहिता-६/२/५/१।
[10] जैमिनिसूत्रम्-०३/०४/२१।
[11] तैत्तिरीयब्राह्मणम्-३/२/५/४।
[12] तत्रैव-१/५/३/१।

[13] दर्शपूर्णमासप्रकरणे पठितमेतद्वाक्यम्।
[14] जैमिनिसूत्रम्-०३/०४/२०।
[15] तत्रैव-०३/०४/२१।
[16] तत्रैव-०३/०४/२८।
[17] तत्रैव-०३/०४/१९।
[18] तैत्तिरीयब्राह्मणम्-१/५/३/१।
[19] जैमिनिसूत्रम्-०३/०४/२२।
[20] तत्रैव-०३/०४/१९।

## सन्दर्भग्रन्थसूची


1. कौण्डभट्टः। (प्रथमप्रकाशनम्, 2019 ई.)। *वैयाकरणसिद्धान्तभूषणम्* (निरञ्जनीव्याख्यया प्रकाशटिप्पण्या च सहितम्, द्वितीयो भागः)। सम्पा. के.वि. रामकृष्णमाचार्यः। Institut Français de Pondichéry, श्रीसोमनाथ-संस्कृत-विश्वविद्यालयः, École Française D'extrême-Orient।
2. कौण्डभट्टः। (पुनर्मुद्रितसंस्करणम्, २०७८ वि.सं.)। *वैयाकरणभूषणसारः* (प्रभा-दर्पण-व्याख्याद्वयोपेतः)। वाराणसी: चौखम्भा संस्कृत संस्थान।
3. कौण्डभट्टः। (२००९ ई.)। *वैयाकरणभूषणसारः* (काशिका-दर्पण-व्याख्याद्वयोपेतः)। वाराणसी: चौखम्बा सुरभारती प्रकाशन।
4. नागेशभट्टः। (प्रथमसंस्करणम्, 1990 ई.)। *वैयाकरणसिद्धान्तलघुमञ्जूषा* (प्रथमो भागः)। सम्पा. आचार्यरामप्रसादत्रिपाठी। वाराणसी: सम्पूर्णानन्दसंस्कृविश्वविद्यालयः।
5. नागेशभट्टः। (प्रथमसंस्करणम्, 1997 ई.)। *वैयाकरणसिद्धान्तलघुमञ्जूषा* (द्वितीयो भागः)। सम्पा. आचार्यरामप्रसादत्रिपाठी। वाराणसी: सम्पूर्णानन्दसंस्कृविश्वविद्यालयः।
6. पेन्ना, मधुसूदनः। (२०२१ ई.)। *मीमांसादर्शनम्* (शाबरभाष्य-श्लोकवार्तिक-तन्त्रवार्तिक-टुप्टीका-प्रभाटीकासहितम्)। नवदेहली: न्यु भारतीय बुक कर्पोरेशन।
7. लौगाक्षिभास्करः। (२०१७ ई.)। *अर्थसङ्ग्रहः* (अर्थालोक-संस्कृत-टीकासंवलितः )। वाराणसी: चौखम्भा पब्लिशर्स।